न्तस्य उपसर्जनस्त्रीप्रत्ययान्तस्य [1]च प्रातिपदिकस्य ह्रस्वो भवति। चित्रगुः। [2]शबलगुः। [3]स्त्रियाः—निष्कौशाम्बिः। [4]निर्वाराणसिः। [5]अतिखट्वः। अतिमालः। उपसर्जनस्य इति किम्? राजकुमारी। [6]स्वरितत्वं किम्? [7]अतितन्त्रीः। अतिलक्ष्मीः। अतिश्रीः ॥

[१८] ईयसो बहुव्रीहेः प्रतिषेधो [8]वक्तव्यः। (म. भा. ~~१~~.~~१~~२४) २.२२४

[9]बहुश्रेयसी। [10]विद्यमानश्रेयसी ॥

## लुक्तद्धितलुकि। (४९/१४०८)

स्त्रीग्रहणमनुवर्तते उपसर्जनस्येति च। पूर्वेण [11]ह्रस्वत्वे प्राप्ते लुग् विधीयते। [12]तद्धितलुकि सति स्त्रीप्रत्ययस्य उपसर्जनस्य लुग् भवति। पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः। [13]दशेन्द्रः (४.२.२४/१२२६) (४.१.८८/१०८०)। पञ्चभिः शष्कुलीभिः क्रीतः[14] पञ्चशष्कुलः (५.१.३७/१७०२) (५.१.२८/१६९३)। आमलक्याः [15]फलमामलकम् (४.३.१४४/१५२४) (४.३.१६३/१५४१)। [16]बदरम्। कुवलम्। [17]तद्धितग्रहणं किम्? [18]गार्ग्याः कुलं गार्गीकुलम्। लुकि [19]इति किम्? [20]गार्गीत्वम्। उपसर्जनस्य इत्येव। अवन्ती। कुन्ती। कुरूः ॥

## इद्गोण्याः। (५०/१७०३)

पूर्वेण लुकि प्राप्ते इकारो विधीयते। गोण्यास्तद्धितलुकि सति इकारादेशो भवति। पञ्चभिर्गोणीभिः क्रीतः पटः [21]पञ्चगोणिः। दशगोणिः। [22]इत् इति योगविभागः[23]। पञ्चभिः सूचीभिः क्रीतः[24] पञ्चसूचिः। दशसूचिः। स च [25]एवंविषय एव ॥

## लुपि युक्तवद्व्यक्तिवचने। (५१/१२९४)

लुपि इति [26]लुप्सञ्ज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते। तत्र [27]लुपि युक्तवद्व्यक्तिवचने[28] भवतः। युक्तवत् इति निष्ठाप्रत्ययेन [29]क्तवतुना प्रकृत्यर्थ उच्यते। स हि प्रत्ययार्थमात्मना युनक्ति। तस्य [30]युक्तवतो व्यक्तिवचने[31] लुबर्थे विधीयेते। अथ वा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन सम्बद्धः, तस्मिन्निव व्यक्तिवचने लुबर्थे भवतः। सप्तम्यर्थे वतिः। व्यक्ति-वचने इति [32]च लिङ्गसङ्ख्ययोः [33]पूर्वाचार्यनिर्देशः, तदीयमेवेदं सूत्रम्। तथा चास्य प्रत्याख्यानं [34]भविष्यति, 'तदशिष्यं सञ्ज्ञाप्रमाणत्वात्' (१.२.५३/१२९५) इति। व्यक्तिः—स्त्रीपुंनपुंसकानि। वचनम्—एकत्वद्वित्व[35]बहुत्वानि। पञ्चालाः क्षत्रियाः पुंलिङ्गा बहुवचनविषयाः। तेषां निवासो जनपदः (४. २. ८१/१२९३)। यथा तेषु क्षत्रियेषु व्यक्तिवचने [36]तद्वज्जनपदे भवतः। पञ्चालाः। कुरवः। [37]मगधाः। मत्स्याः। अङ्गाः। [38]वङ्गाः। [39]सुह्माः। पुण्ड्राः।

1. च नास्ति क.फ, ०प्रत्ययान्तप्रातिपदिकस्य ड. 2. नास्ति ह. 3. स्त्री अ.क.ड.फ. 4. नास्ति ह. 5. अतिखट्वी फ, नास्ति अ. 6. स्वरितत्वविज्ञानं अ. क. ह. 7. अतितन्त्रि ह. 8. वक्तव्यः नास्ति ड. 9. अवनिपालः इत्यधिकम् क. 10. निर्धनः इत्यधिकम् अ. क. 11. ह्रस्वे अ. ब. क. ह. 12. क्वचित् इत्यधिकम् ह. 13. नास्ति फ. 14. कटः ह, दशशष्कुलः इत्यधिकम् ब.क.ड.फ.ह. पंचशष्कुलो देशः क. 15. विकारः ह. 16. विम्बम् फ, कुलम् ह. 17. तद्धित इति अ. 18. गार्ग्याः कुलम् नास्ति फ.ह.ग, गार्गीकुलम् नास्ति ब. 19. इति नास्ति ड. 20. गर्गीत्वम् ग. 21. पञ्चगौणिः दशगौणिः क, दशगोणिः नास्ति अ. 22. इत् इति—दशसूचिः नास्ति फ. 23. पञ्चसूच्याद्यर्थं इत्यधिकम् ह, सूच्याद्यर्थं इत्यधिकम् अ. 24. पटः इत्यधिकम् अ.ह. 25. एवंविधिः फ. 26. लुप्तसञ्ज्ञया अ. ड. इ. 27. लुपि नास्ति अ. क. फ. ह. 28. ०न लुबर्थे इत्यधिकम् ग. 29. क्तक्तवतुना फ. 30. युक्तवत् फ. 31. ते अ. ह. 32. च नास्ति ड. फ. 33. पूर्वाचार्यसञ्ज्ञानिर्देशः फ.ह. 34. करिष्यते. अ. क, करिष्यति ह. 35. ०बहुवचनानि अ. 36. तथा जनपदेष्वपि फ. ह. 37. नास्ति क. फ. ग. 38. नास्ति फ. 39. सुह्माः पुण्ड्राः नास्ति ह.